पैत्र्यमखिलं चारिमण्डलमिति” रघुः । “न निशाखिल-
यापि वापिका प्रससाद प्रहिलेव मानिनीति” नै० ।
**अग** इदित् गतौ भ्वादि० पर० । अङ्गति । आङ्गीत् ।
ल्युट् अङ्गनम् असुन् अङ्गः । [यति ।
**अग** वक्रगतौ भ्वादि०पर०घटादि । अगति आगीत् । अग-
**अग** पु० न गच्छतीति गम-ड न०त० । वृक्षे, पर्व्वते, च ।
गमनाकर्त्तरि भूद्रादौ त्रि० । न गच्छति वक्रगत्या
पश्चिमम् । सूर्य्ये तस्य हि वक्रगत्यभावः ज्योतिषप्रसिद्धः ।
“वक्रशीघ्रगतिश्चैव भवेत् भौमादिपञ्चके” इत्युक्तेः आर्य्यभट्ट
मते तु पृथिव्याएव गतिमत्त्वेन दिनरात्रिसम्भवात् सूर्य्यस्य
न गतिमत्त्वम् । सप्तसंख्यायाञ्च कुलाचलानां सप्तत्वेन
तेषाञ्च प्राधान्यात् “प्रधानेन व्यपदेशाभवन्तीति” न्यायात्
तथात्वम् ।
**अगच्छ** पु० गम-बा० श न०त० । वृक्षे ।
**अगज** न० अगात् पर्वतशिलातो जायते जन—ड । शिला-
जतुद्रव्ये । पर्वतजातमात्रे त्रि० ।
**अगण्य** त्रि० गणयितुमशक्यम् गण-शक्यार्थे यत् न० त० ।
गणयितुमशक्ये असंख्ये । “गुणैरगण्यैरतिशीलशालिभि-
रिति” । अर्हे यत् न०त० । गणनानर्हे, अकिञ्चित्करे त्रि० ।
**अगति** स्त्री गम—क्तिन् न०त० । उपायाभावे । बहु० ।
गतिशून्ये, उपायशून्ये च त्रि० । स्वार्थे कन्, शेषाद्वा कप्
तत्रैवार्थे त्रि० “मामगतिकमिति” शङ्कराचार्य्यः ।
**अगद** पु० नास्ति गदो रोगो यस्मात् ५ब० । औषधे
६ब० । “औषधान्यगदोविद्या दैवी च विविधा स्थितिः ।
तपसैव प्रसिध्यन्तीति” पुराणम् । रोगशून्ये त्रि० ।
गद-भाषणे अच्-न०त० । अकथके त्रि० । [दीत् ।
**अगद** नीरोगत्वे कण्ड्वा० पर० । अगद्यति आगद्यीत्—आग-
**अगदङ्कार** पु० अगदं करोति अगद+कृ—अण् मुम् च ।
वैद्ये । [न्तरि त्रि० ।
**अगम** पु० न गच्छतीति गम—अच् न०त० । वृक्षे । अग-
**अगम्य** त्रि० न—गन्तुमर्हति गम—यत् न०त० । गमनानर्हे
“अगम्या सा भवस्तत्र यत्राभूत् स महारण इति” चण्डी ।
अन्त्यजातिस्त्रियां स्त्री । “अगम्यां च स्त्रियं गत्वेति”
“अगम्यागमनञ्चैव जातिभ्रंशकराणि षडिति” च स्मृतिः
दुर्बोध्ये “योगिनामप्यगम्योऽसाविति” पुराणम् ।”
**अगरी** स्त्री नास्ति गरो विषं यस्याः ५ब० गौ०ङीष् । मूषिक-
विषहारिणि देवताडवृक्षे । विषहारिणि द्रव्यमात्रे त्रि० ।
**अगरु** न० न गिरति गॄ—उ न०त० । स्वनामप्रसिद्धे अगुरु-
चन्दने । “कौसुमस्रजमेताञ्च चन्दनागरुचर्चितामिति”
दुर्गापूजामन्त्रः “चन्दनागुरु” इति पाठान्तरम् ।
**अगर्हित** त्रि० न०त० । निन्दितभिन्ने शुद्धे, “यत्किञ्चित्-
स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितमिति” स्मृतिः ।
**अगस्ति** पु० अगं विन्ध्याचलम् अस्यति अस्—क्तिच् शक-
न्ध्वादि० । अगस्त्यनामके मुनौ । अगस्त्यस्यापत्यानि बहुषु
यञोलुक् । तद्गोत्रापत्येषु ब०व० । तत्सम्बन्धित्वात् दक्षिणस्यां
दिशि । अगस्त्यजन्मकथा च । “तयोरादित्ययोः सत्रे
दृष्ट्वाप्सरसमुर्व्वशीम् रेतश्चस्कन्द तत् कुम्भे न्यपतद्वाशतीवरे
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ, अगस्त्यश्च वशिष्ठश्च
तावृषी संबभूवतुः । बहुधा पतितं रेतः कलसे च जले
स्थले । स्थले वशिष्ठस्तु मुनिः संभूवर्षिसत्तमः । कुम्भे-
त्वगस्त्यः सम्भूतः जले मत्स्यो महाद्युतिः । उदियाय
ततोऽगस्त्यः क्षणमात्रे महातपाः इति” पुराणम् । तस्य
च विन्ध्याचलस्तम्भनकथा काशीखण्डेऽनुसन्धेया । वृहत्-
संहितायामस्य गगनमण्डले दक्षिणस्यां ताराद्रूपेण स्थिति-
रुक्ता तच्च अगस्त्यचारशब्दे द्रष्टव्यम् ।
**अगस्तिद्रु** पु० अगस्तिप्रियः द्रुर्वृक्षः शाक० त० । वकवृक्षे ।
अगस्तिवृक्षादयोप्यत्र ।
**अगस्त्य** पु० अगं विन्ध्याचलं स्त्यायति स्तभ्नाति स्त्यै—क ।
अगस्त्यनामके मुनौ । अगस्त्यचरितामाशां प्रतस्थे दिग्-
जिगीषयेति” रघुः । यस्का० यञ् । आगस्त्यस्तदपत्ये ।
**अगस्त्यगीता** स्त्री अगस्त्येन गीता विद्याभेदः । भारते
शान्तिपर्वणि प्रसिद्धे विद्याभेदे ।
**अगस्त्यचार** पु० अगस्त्यस्य नक्षत्ररूपेण दक्षिणस्थस्य चारः
शुभाशुभसूचकगत्यादि । वराहसंहितोक्ते अगस्त्यनामक-
नक्षत्रस्य उदयादौ । यथा “विन्ध्यस्तम्भयद्यस्य तस्योदयः
श्रूयताम्” इत्युपक्रमस्य । “उदये च पुनेरगस्त्यनाम्नः कु—समा-
योगमलप्रदूषितानि । हृदयानि सतामिव स्वभावात् पुन-
रम्बूनि भवन्ति निर्म्मलानि ॥ पार्श्वद्वयाधिष्ठितचक्रवाकामा-
पुष्णाती सस्वनहंसपङ्क्तिम् । ताम्बूलरक्तोत्कर्षिताग्रदन्ती
विभाति योषेव सरित्सहासा ॥ इन्दीवरासन्नसितोत्पला-
न्विता सरिद्भ्रमत्षट्पदपङ्क्तिभूषिता । सभ्रूलताक्षेपकटाक्ष-
वीक्षणा विदग्धयोषेव विभाति सस्वरा ॥ इन्दोः पयोदवि-
गमोपहितां विभूतिम् द्रष्टुं तरङ्गवलया कुमुदं निशासु ।
उन्मीलयत्यलिनिलीनदलं सुपक्ष्म वापी विलोचनमिवा-
सिततारकान्तम् ॥ नानाविचित्राम्बुजहंसकोककारण्डवा-
पूर्णतडागहस्ता । रत्नैः प्रभूतैः कुसुमैः फलैश्च भूयच्छती